23. यौगिकरूढशब्दान् मञ्जूषादिशा विश्लेषयत।

24. ध्वनिस्तु द्विविध इति नागेशमतं वाक्यपदीयस्य साह्येन समर्थयत।

Part D

IV. द्वयोः निबन्धात्मकमुत्तरं लिखत। (2X15=30)

25. परमलघुमञ्जूषादिशा वाचः चातुर्थ्य निरूपयत।

26. शाब्दबोधसहकारिकारणानि विशदयत।

27. लक्षणास्वरूपं भेदान् च नागेशोक्तदिशा प्रतिपादयत।

28. वैयाकरणमते शक्तिस्वरूपं विशदयत.

Paper IV

Semester	Course Code	Course Title	L	C
III	SJ- DE- 234	Complimentary course Jyothisha	6	4

Title of the Paper : **कालकल्पनम्**
(KALAKALPANAM)

प्रयोजनानि

1.ज्योतिश्शास्त्रस्वरूपं राशिस्वरूपं च अधिकृत्य ज्ञानं सम्पादयति।

2.राशीनाम् अङ्गविभागमधिकृत्य ग्रहाणाम् उच्चनीचादिसंज्ञामधिकृत्य च परिचयं सम्पादयति।

3.कालमानं चान्द्रसौरमासदिव्यदिनादीनधिकृत्य बोधं जनयति।

4.देवासुरदिनरात्रिवर्षाणि चतुर्युगमहायुगमानमवगच्छति।

5.मुहूर्तप्राधान्यं मुण्डनमुहूर्तं तथा केन्द्रस्थग्रहफलानि च अवगच्छति।

6.चन्द्रग्रहण-सूर्यग्रहणविषयमधिकृत्य विज्ञानमर्जयति।

विषयविभागः

प्रथमांशः- राशिस्वरूपं कालपुरुषस्य अङ्गविभागः राशीनां दिग्ज्ञानं राशीनां दिनरात्रिपरिचयः केन्द्र-पणपर-आपोक्लिम-उपचयापचयभावचिन्ता।

ERT- सारावली (अध्यायः 3)

द्वितीयांशः - कालपरिभाषा चान्द्रसौरमानं देवासुरमानं महायुगमानं कृतादियुगमानं कल्पमानं ब्रह्ममानञ्च।

ERT- सूर्यसिद्धान्तः (मध्यमाधिकारे श्लोकः 1-24)

तृतीयांशः - मुण्डनमुहूर्तः तत्र केन्द्रस्थग्रहाणां फलं च। कन्यावरण-वरवरणमुहूर्तः, विवाहे ग्रहशुद्धिः मासशुद्धि च।

ERT- मुहूर्तचिन्तामणिः (अध्यायः 5- श्लोकः 29-30, अध्यायः 6- श्लोकः 1-15)

चतुर्थांशः - चन्द्रग्रहण-सूर्यग्रहणपरिचयः।

ERT- सूर्यसिद्धान्तः (चन्द्रग्रहणाधिकारे श्लोकः 6, सूर्यग्रहणाधिकारे श्लोकः 1,2)

Books for Reference

1. Madhaveeyam – Bhasha Com., P.S.Purushathaman Namboothiri, S.T. Redyar & Sons, 2005

2. Aryabhateeyam - (Bhattadeepika, Bhattaprakasika, Ganga Com.), Sathya Deva Sarma, Chaukhamba Surabharathi Prakasan, 2013.

3. Muhurthamarthandah –(Marthanda Vallabha, Marthanda Priya Com.), Sathyenda Misra, krishnadasa Academi,Varanasi, 1990

4. Muhurthapadavee – Panchamgam Book Stall, Kunnamkulam (Mal.Year.1182)

5. Sidhanta Siromanih – Surya Prabha Hindi com. , Sathyadeva sarma, Chaukhamba Surabharathi Prakasan, Varanasi, 2015.

E-Resource

https://epgp.inflibnet.ac.in

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	ज्योतिश्शास्त्रस्वरूपं राशिस्वरूपं च अधिकृत्य ज्ञानं सम्पादयति।	1	2	U	F
2	राशीनाम् अङ्गविभागमधिकृत्य ग्रहाणाम् उच्चनीचादिसंज्ञामधिकृत्य च परिचयं सम्पादयति।	2	2	R	F
3	कालमानं चान्द्रसौरमासदिव्यदिनादीनधिकृत्य बोधं जनयति।	6	4	AN	C
4	देवासुरदिनरात्रिवर्षाणि चतुर्युगमहायुगमानमवगच्छति।	6	5	AN	C
5	मुहूर्तप्राधान्यं मुण्डनमुहूर्तं तथा केन्द्रस्थग्रहफलानि च अवगच्छति।	2	3	U	P
6	चन्द्रग्रहण-सूर्यग्रहणविषयमधिकृत्य विज्ञानमर्जयति।	6	9	C	M

UNIVERSITY OF KERALA

MA SANSKRIT SPECIAL JYOTHISHA EXAMINATION

Semester III .Complementary Course III for Vyakarana

Course code SJ - DE– 234

कालकल्पनम् (Kalakalpanam)

2021 Admission onwards

TIME 3 Hrs. **Total Marks 75**

देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि

PART A

I. सर्वषां प्रश्नानाम् उत्तराणि लिखत। **10X1 = 10**

1. जन्मभं नाम किम् ?
2. पणपरराशयः के ?
3. मुहूर्त्तचिन्तामणेः कर्त्ता कः ?
4. इन्दोः मूलत्रिकोणराशिः कः ?
5. त्रिज्येष्ठं नाम किम् ?
6. सूर्यग्रहणस्पर्शः कस्यां दिशि ?
7. सूर्यांशपुरुषमयासुरसंवादरूपः ग्रन्थः कः ?
8. सावनं दिनं किम् ?
9. महायुगमानं कति ?
10. चतुर्युगानि कानि ?

PART B

II. पञ्चानां प्रश्नानाम् उत्तराणि लिखत। **5x2=10**

11. सूर्यः सूर्यांशपुरुषं नियोजयितुं कारणं किम् ?
12. धर्मपादव्यवस्था का ?
13. एकस्मिन् कल्पे महायुगाः कति ?
14. चन्द्रग्रहणे ग्राह्यग्राहकौ कौ ?
15. ह्रस्व-मध्य-दीर्घराशयः के ?
16. करपीडनार्थं शुभमासाः के ?
17. उपचय-अपचयभावाः लिखत ?

PART C

III. पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत। **5x5 =25**

18. कालभेदोत्र केवलः।

19. महायुगे सन्धयः।

20 सूर्यग्रहणं कथं सम्भवति ?

21. सूर्यसिद्धान्तग्रन्थरचनाकाले गतकालमानम् किम् ?

22. उच्चनीचराशयः।

23. ज्येष्ठमिति शब्दस्य साधनं कथम् ?

24. द्वादशभावानां नामान्तराणि लिखत ।

PART D

IV. द्वयोः निबन्धात्कममुत्तरं लिखत। 2x15 = 30

25. मुहूर्त्तचिन्तामणेः परिचयं दत्वा कन्यावरणमुहूर्त्तः विशदीकुरुत ।

26. सोदाहरणं षड्वर्ग्गाणां परिचयं कुरुत ।

27. ग्रहणयोः परिचयं कुरुत।

28. कालस्य द्वैविध्यं विशदयत।

Semester IV

Semester	Course Code	Course Title	L	C
IV	SY- CC-241	Vyakarana X	7	4

Title of the Paper : भर्तृहरिदर्शनम्

(BHARTRHARIDARSANAM)

ERT : वाक्यपदीयम् (ब्रह्मकाण्डम्)

प्रयोजनानि।

1. संस्कृतव्याकरणक्षेत्रे भाषाशास्त्रक्षेत्रे च भतृहरे: प्रधान्यमवगच्छति।

2. व्याकरणशास्त्रे वाक्यपदीयग्रन्थस्य प्राधान्यं जानाति।

3. शाब्दिकानां प्रमाणानि, अष्टपदार्थनिरूपणं, ध्वनिस्फोटतत्वञ्च बुद्ध्यते।

4. व्याकरणाध्ययनप्रयोजनं वेदान्तदृष्ट्या जानाति।

5. व्याकरणशास्त्रस्य दार्शनिकदृष्टिम् अधिगच्छति।

Module 1. वाक्यपदीयम् - कारिका -1 – 40 **(20Marks)**

Module 2. वाक्यपदीयम्-कारिका - 41 – 80 **(20Marks)**

Module 3. वाक्यपदीयम् - कारिका – 81 – 120 **(20Marks)**

Module 4. वाक्यपदीयम् - कारिका – 121 – 156 **(15Marks)**

Books for Reference

1. वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः, डो.कालिकाप्रसादशुक्लः, सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी-1979.

2. परमलघुम़ञ्जूषा, किरणावली व्याख्या, व्याख्याता आचार्य लोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी,1991.
3. परमलघुमञ्जूषा, भावप्रकाशिका बालबोधिनी व्याख्ये, डो.जयसङ्करलालत्रपाठी, कृष्णदासअकादमी, वाराणसी-1997.
4. वाक्यपदीयम्(ब्रह्मकाण्डम्) व्याख्याद्वयोपेतम्, पद्मश्रीपण्डितरघुनाथशर्मा, सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी,1988.
5. **Vakyapadiyam, Brahmakandam (Sunilpriya Mal.com.) , Dr. Chandrasekharan nair, , Jai karthik books -2000,**

E Resources

1. **www.hindupedia.com**
2. **www.exoyicindiaart.com**
3. **archive.org**
4. **epustakalay.com**

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	संस्कृतव्याकरणक्षेत्रे भाषाशास्त्रक्षेत्रे च भतृहरे: प्रधान्यमवगच्छति।	1,3	1	U	C
2	व्याकरणशास्त्रे वाक्यपदीयग्रन्थस्य प्राधान्यं जानाति।	1	1	U	C
3	शाब्दिकानां प्रमाणानि, अष्टपदार्थनिरूपणं, ध्वनिस्फोटतत्वञ्च बुद्ध्यते।	1,2,3	1,2	U	F
4	व्याकरणाध्ययनप्रयोजनं वेदान्तदृष्ट्वा जानाति।	1,,2,3	1,2,3,5	U, AN	M
5	व्याकरणशास्त्रस्य दार्शनिकदृष्टिम् अधिगच्छति।	1,2	1,2,5	U, AN	F

UNIVERSITY OF KERALA

III SEMESTER MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Subject Code: SY- CC- 241

Vyakarana X

TITLE : भर्तृहरिदर्शनम्

(BHARTRHARIDARSANAM)

Time: 3Hrs **Total Marks: 75**

सूचना – देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि

Part A

I. सर्वेषां प्रश्नानाम् उत्तराणि लिखत। **(10X1 =10)**

1. भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः, कस्य?

2. शब्दानामनुशासनं कैः आरभ्यते?

3. प्रथमं छन्दसामङ्गं किम्?

4.शब्दतत्त्वं विवर्तते, कथम्?

5.भावविकाराः कति?

6.वाचः निमित्तानि कुत्र भासते?

7.महर्षिभिः शब्दार्थसम्बन्धः कथं आम्नातः?

8.बुद्धिस्थः शब्दोऽपि कस्य पृथक्कारणं भवति?

9. पदभेदेऽपि वर्णानां किं न निवर्तते?

10. तस्य वेदस्य शाखासु शब्दानां किं दृश्यते?

Part B

II. पञ्चानां प्रश्नानामुत्तराणि लिखत। **(5X2=10)**

11. जगतः प्रक्रिया कुतः?

12. शब्दार्थसम्बन्धः कथम्?

13. शब्दस्य सक्तिद्वयं किम्?

14. मणिरूप्यादिविज्ञानं किंरूपं भवति?

15. शब्दाः केषां निबन्धनं भवन्ति?

16.व्यङ्ग्यव्यञ्जकशब्दयोर्भेदः कथं प्रदर्शितः?

17. नानुमानेन बाध्यते कुतः?

Part C

III. पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत। (5X5=25)

18. पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते- विखत।

19. ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।– विवेचयत।

20. एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते, उपपादयत।

21. इन्द्रियस्यैव संस्कारः –विशदयत।

22. तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते- निरूपयत।

23. अनेकतीर्थभेदायास्त्रय्या वाचः परं पदं- विशदयत।

24.प्राकृतवैकृतध्वनी विशदयत।

Part D

IV. द्वयोः निबन्धात्मकमुत्तरं लिखत। (2X15=30)

25. शब्दब्रह्मणः स्वरूपं वाक्यपदीयदिशा वर्णयत।

26. व्याकरणाध्ययनस्य प्रयोजनानि भर्तृहरिमतानुसारं निरूपयत।

27. हरिमतानुसारं आगमप्रमाणं विशदयत।

28. शब्दसाधुत्वविषये हरिमतं प्रदर्शयत।

Paper II

Semester	Course Code	Course Title	L	C
IV	SY- CC-242	Vyakarana XI	6	4

Title of the Paper : शाब्दबोधः III

(SABDABODHAH III)

ERT- : परमलघुमञ्जुषा । (निपातार्थनिर्णयादारभ्य नामार्थविचारपर्यन्तम्)

प्रयोजनानि

1. नागेशभट्टस्य शाब्दबोधक्षेत्रे योगदानं जानाति।

2. निपातार्थविषये ज्ञानं सम्पादयति।

3. लकारार्थविषये वैयाकरणानां नैयायिकानां च मतं विवेचयति।

4. कारकविषये नागेशमतं विवेचयति।

5. नामार्थान् जानाति ।

Module 1. परमलघुमञ्जूषायां निपातार्थनिरूपणम्। **(20Marks)**

Module 2. दशलकारादेशार्थनिरूपणम्। **(20Marks)**

Module 3. कारकार्थनिरूपणम् । **(20Marks)**

Module 4. नामार्थनिरूपणम् । **(15Marks)**

Books for Reference

1.वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः, डो.कालिकाप्रसादशुक्लः, सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी-1979.

2.परमलघुम्ञ्जूषा, किरणावली व्याख्या, व्याख्याता आचार्य लोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी,1991.

3.परमलघुमञ्जूषा, भावप्रकाशिका - बालबोधिनी व्याख्ये, डो.जयशङ्करलालत्रपाठी, कृष्णदास अकादमी, वाराणसी-1997.

E- Resources.

www.wisdomlib.org

barainly.in

m.facebook.com

shodhganga.inflibinet.ac.in

www. mgu.ac.in

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	नागेशभट्टास्य शाब्दबोधक्षत्रे योगदानं जानाति।	**1,2**	**1**	**U**	**C**
2	निपातार्थविषये ज्ञानं सम्पादयति।	**1,2,3**	**1,2,3,5**	**AN**	**C**
3	लकारार्थविषये वैयाकरणानां नैयायिकानां च मतं विवेचयति।	**1,2,3**	**1,2,3**	**AN**	**M**
4	कारकविषये नागेशमतं विवेचयति।	**1,2**	**1,2,3**	**AN**	**M**
5	नामार्थान् जानाति।	**1, 2**	**1,2,3**	**AN, U**	**M**

UNIVERSITY OF KERALA

IV SEMESTER MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Subject Code: SY- CC-242

Vyakarana XI

Title: शाब्दबोधः III

(SABDABODHAH III)

Time: 3Hrs **Total Marks: 75**

सूचना – देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि

Part A

I. सर्वेषां प्रश्नानाम् उत्तराणि लिखत। **(10X1=10)**

1. परमलघुमञ्जूषानुसारं सकर्मकत्वं नाम किम्?

2. अनुभूयते सुखम् इत्यत्र कर्मणि लकारः कथम्?

3. प्रकृतधातुवाच्यव्यापाराश्रयत्वम् किम्?

4. किं नाम भविष्यत्वम्?

5. शब्दानां जातौ शक्तिः इति केषां मतम्?

6, अभिहिते का विभक्तिः?

7. निपातानां वाचकत्वेमेवेति केषां मतम्?

8. अमनुष्यं प्राणिनमानय इत्यत्र नञ् कस्मिन्नर्थे वर्तते?

9. क्रियाप्रधानमाख्यातमित्युक्तिः कस्य?

10. शाब्दबोधे शब्दः कथं भासते?

Part B

II. पञ्चानां प्रश्नानामुत्तराणि परमलघुमञ्जूषादिशा लिखत। **(5X2=10)**

11. परोक्षत्वम्।

12. अपादानलक्षणम्।

13. तात्पर्यग्राहकत्वम्।

14. कर्मत्वम्।

15. कारकाणि।

16. नैयायिकानां सकर्मकत्वलक्षणम्।

17. वर्तमानकालः कः।

Part C

III. पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत। **(5X5=25)**

18. द्योतकत्वस्य भेदत्रयं नागेशदिशा निरूपयत।

19. अधिकरणभेदान् नागेशदिशा लिखत।

20. नञर्थाः षट् प्रकीर्तिताः- विशदयत।

21. चन्द्र इव आह्लागकं मुखम् – शाब्दबोधः कः ।

22. विशिष्टस्य न धातुत्वं अपाठात्।

23. अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते इति भर्तृहरिमतं नागेशः कथं विवृणोति।

24. शक्तिग्रागकाः के इति विशदयत।

Part D

IV. द्वयोः निबन्धात्मकमुत्तरं लिखत। **(2X15=30)**

25. लकारार्थविषये नैयायिकपक्षं प्रदर्शयत।

26. निपातानामर्थवत्वमपि द्योत्यार्थमादायैव – मतमिदं विमृशत।

27.परमलघुमञ्जूषादिशा सम्प्रदानस्वरूपं विसदयत।

28. नामार्थान् नागेशोक्तदिशा लिखत।

Paper III

Semester	Course Code	Course Title	L	C
IV	SY- CC- 243	Vyakarana XII	6	4

Title of the Paper : LINGUISTICS AND MANUSCRIPTOLOGY

ERT- : An introduction to Sanskrit Linguistics of Srimannarayanamurti For Module I & II)

Manuscriptology of K Maheswaran Nair (For Module III & IV)

Merits

1. Realise the relevance of Sanskrit Grammar in modern linguistics.

2. General awareness of sentence formation in Sanskrit & other languages.

3. Capable to compare the Semantic aspects of Sanskrit Language with other languages.

4. Identify the importance of Manuscripts and its Preservation.

5. Enable to read and publish the Manuscripts.

Module 1. Morphology- Morphes- Morphems – Suffixws – Word formation, Syntax sentence formation in Sanskrit, English and Modern Indian languages- Concept of Sentence in Sanskrit. (20 Marks)

Module 2. Semantics- Generalization, Specialization, Transference.- Interdisciplinary fields & Modern Trends in Linguistics – Langue and Parole- Structuralism- Generative Grammar, Semiotics, G B theory, minimalism, deep structure and surface Structure. (20Marks)

Module 3. Definition, Nature, Scope, Branches and Aim, Collection of manuscripts, cataloguing of manuscripts and preservation of manuscripts. (20Marks)

Module 4. Reading the scripts, Textual criticism, edition and publication of manuscripts. (15Marks)

Books for Reference

1. Historical Linguistics- An Introduction – wenfred P.. Lehmann.

2. Comparative philology (of Indo-European Languages) by T K Ramachandra Aiyar

3. Language – Leonard Bloomfield

4. Sanskrit Linguistics – Ghose B.K.

5.Transformational Grammar- ratford A.

6. Linguistic Change- An Introduction to Sanskrit.- sturtevent E.H

7. An introduction to descriptive Linguistics- Gleason H.A.

E- Resources.

1. www.tu- Chemnitz.de
2. www.tandfonline.com
3. en.m.wikipedia.org.
4. www.uni-due.de
5. homepage.ruhr-uni-bochum.de
6. www.researchgate.net
7. halshs.archives-ouvertes.
8. www.cambridge.org.

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	Realise the relevant of Sanskrit Grammar in modern linguistics.	2	2,3	U	C
2	General awareness of sentence formation in Sanskrit & other languages.	3,4	,2,3,5	U, AN	C
3	Capable to compare the Semantic aspects of Sanskrit Language with other languages.	3, 4	2,3	U, AN	M
4	Identify the importance of Manuscripts and its Preservation.	3	3,4	U	C
5	Enable to read and publish the Manuscripts.	1,2,3	3, 4	U, AP, AN	M

UNIVERSITY OF KERALA

IV SEMESTER MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Subject Code: SY- CC-243

Vyakarana XII

Title: Linguistics and Manuscriptology

Time: 3 HRS **Total Marks: 75**

Part A

I. Answer all Questions: **10**x1=10

1. Which is the earliest available illuminated Manuscripts in India?
2. Who is the first ventured to collect Manuscripts edit and publish?
3. What are the writing materialsin Manuscripts?
4. What is Morph?
5. In which class belongs to Indo-European Language?
6. What is mean by Semantics?
7. What is mean by shifting of meaning?
8. What is mean by widening of meaning?
9. What are the divisions of Morphology?
10. What is Documents?

Part B

II. Answer any five of the following in a sentence or two each **5**x2=10

11. What is Suffix?
12. Explain Syntax?
13. What is Transference?
14. G. B theory.
15. ExplainMinimalism?

16. Definition of Manuscriptology.

17. Script - explain.

Part C

III. Write short noteson any five of the following. **5**x5=25

18. Explain Textual Criticism.

19. Nature and scope of Manuscriptology.

20. Deep structure and surface structure explain.

21. Explain Morphology.

22. Structuralism.

23. Cataloging of Manuscriptology

24. ExplainGeneralization and Specialization of linguistics.

Part D

IV. Write essays on any two. **2**x15=30

25. What is collection of manuscript? Important collections of manuscripts in India.

26. What are the modern trends in linguistics?

27. Explain the edition and publication of Sanskrit linguistics.

28. Structure of sentence formation in Sanskrit and English - explain.

Paper IV

Semester	Course Code	Course Title	L	C
IV	SV- DE- 244	Complimentary course Vedantha	6	4

Title of the paper:- Rgveda And Kathopanishad

Module Outcomes:

To remember Prasthanatraya and the terminology of Upanishad

To understand the works of Sankara and the style of Prakaranas

To analyze the narrative style of Kathopanishad

To understand the principles of Advaita through Upanishads

To analyze the concept of Ratha and Rathi

To understand the nature of the content in the Vedas

To understand the origin of Vedanta Philosophy in the Vedic Suktas

Module I **Rgveda sukthas - Agnisukta (I.1), Purusha Sukta (X.90) & Nasadiya Sukta (X.129)**

ERT-Rgveda(Corresponding Sukthas) **(40 Marks)**

Module II **Kathopanishad Valli 1**

The Sacrifice done by Naciketa's Father, Naciketa's Question and father's reply, Naciketa at Yama's abode, The three boons, Knowledge of Brahman asked as the Boon.

ERT Kathopanishad **(15 Marks)**

Module III **Kathopanishad Valli 2**

Sreyas and Preyas, The supremacy of knowledge of Brahman, The nature of Brahman.

ERT Kathopanishad **(10 Marks)**

Module IV Kathopanishad Valli 3

Jivatma and Paramatma, Ratha-Rathi Kalpana, Path for seekers of Knowledge. **(10 Marks)**

Books for Reference

1. **Kathopanishad with Sankarabhashya, Choukhamba Krishnadas Academy, Varanasi, 2008**
2. **Rgveda Samhita with Sayanabhashya, Vaidic Samsodhan Mandal, n.d**
3. **Rgveda Gurudakshina Bhashya,8 vol.s, Chandrasekharan Nair K, Kerala Bhasha Institute, Thiruvananthapuram,2014**
4. **A Vedic Reader for students, A Macdonell, Oxford , London, 1917**
5.

CO	CO Statement	PO/PSO	CL	KC
1	To remember Prasthanatraya and the terminology of Upanishad	PO1/PO3/PSO1	R	F,C
2	To understand the works of Sankara and the style of Prakaranas	PO1/PSO1	U	F
3	To analyze the narrative style of Kathopanishad	PO2/PO3	U	F
4	To understand the principles of Advaita through Upanishads	PO1/PO2/PSO2	U	C
5	To analyze the concept of Ratha and Rathi	PO1/PO2/PSO2	U	C
6	To understand the nature of the content in the Vedas	PO1/PSO1	U	C
7	To understand the origin of Vedanta Philosophy in the Vedic Suktas	PO1/PSO1	U	C

(L-Lecture: CL- Cognitive Level: R- Remember, U- Understand, Ap- Apply, An- Analyse, E- Evaluate, C- Create, KC- Knowledge Category: F- Factual, C- Conceptual, P- Procedural, M- Metacognitive)

UNIVERSITY OF KERALA

MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

COMPLEMENTARY COURSE IV- FOR VYAKARANA

SV-DE-244- SAMHITA AND UPANISAD

TIME 3 Hrs. **Total Marks 75**

देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि।

PART-A

I. सर्वषां प्रश्नानाम् उत्तराणि लिखत। **(10X1 = 10)**

1. ऋग्वेदस्य प्रथमसूक्तस्य देवता का?

2. पुरुषसूक्तस्य ऋषिः कः?

3. पुरोहितशब्देन कं विशिनष्टि?

4. नोसदासीत्तदानीम् इत्यत्र तदानीमित्यस्यार्थः कः?

5. नायं प्रवचनेन लभ्यः। कः?

6. न तर्पणीयो मनुष्यः केन?

7. तस्यैतां शान्तिं कुर्वन्ति। कस्य?

8. न भयं किञ्चनास्ति। कुत्र?

9. उभे तीर्त्वा स्वर्गलोके मोदते। - उभे के?

10. बुद्धेः परः कः?

PART-B

II. कमपि ग्रन्थमनपहायपञ्चानां प्रश्नानाम् उत्तराणि लिखत। **(5x2=10)**

11. मत्वा धीरो हर्षशोकौ जहाति।– कं मत्वा?

12. द्वितीयः वरः कः?

13. तत्ते पदं संग्रहेण ब्रवीमि।– कीदृशं पदम्?

14. निचाय्य तन्मृत्युमुखात् प्रमुच्यते।– किं निचाय्य?

15. तान् स गच्छति ताः ददत्।– काः कान् गच्छति?

16. ब्राह्मणोऽस्य मुखमासीत्··· इति मन्त्रं पूरयत।

17. स नः पितेव सूनवे... इति मन्त्रं पूरयत।

PART-C

III. कमपिग्रन्थमनपहाय पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत। (5x5 =25)

18. आत्मस्वरूपम्।

19. यमेन कृतं प्रलोभनम्।

20. रथरथिकल्पना।

21. तदानन्त्याय कल्पते। - विशदयत।

22. सहस्रशीर्षा पुरुषः··· इति मन्त्रं व्याख्यात।

23. नासदासीत्··· इति मन्त्रं व्याख्यात.

24. यदङ्ग दाशुषे··· इति मन्त्रं व्याख्यात।

PART-D

III. कमपिग्रन्थमनपहाय द्वयोः निबन्धात्कममुत्तरं लिखत। (2x15 = 30)

25. पुरुषसूक्तं संक्षिप्य लिखत।

26. नासदीयसूक्तं निरूपयत।

27. यमेन प्रदत्तं वरत्रयम्।

28. श्रेयप्रेयसोः स्वरूपम् यथाग्रन्थं विशदयत।

SY-CC-245	**Dissertation**	**20 (Viva) marks**	**80 Marks**	**100 Marks**	**C 4**

Instructions to candidates for Dissertation

Prescribed Format of Dissertation

1. Physical format

i. The dissertation should be hardbound or spiral bound with no emblem or advertisement of any kind.

ii. The candidate should submit three bound copies and one CD (soft copy of the dissertation

iii. only A4 size paper should be used.

iv. printing may be done in one side only.

v. The minimum number of pages 70 and maximum number of pages should not exceed 120, including appendices etc.

vi. Dissertation should in one volume.

2. Title Page

i. Title of the thesis.

ii. Dissertation submitted to the University of Kerala for the partial fulfilment of the Degree of Master of Arts in Sanskrit Special Vyakarana

iii. Register number of the Candidate

iv. Name of the College.

v. Year of submission

3. Declaration by the candidate

I hereby declare that the Dissertation entitled,..... is an independent work carried out by me and it has not been submitted anywhere else for any other degree or diploma. The Declaration to be followed by name and signature of the candidate.

5. Certificate

This is to certify that the work embodied in the thesis entitled ..... has been carried out by (Name of the candidate) under my guidance. It should be followed by name and official address of the supervising teacher.

Both declaration and certificate should be in a single page. The copy of dissertation submitting to the University should not have names of students and the supervising teacher.

5. Preface

6. Acknowledgement

7. Contents page

8. List of abbreviations

9. Body of the thesis

i. Spacing (Before 6pt. After 6.pt) 1.5 line spacing.

ii. Normal margin (left and Right 3.54, top and bottom 2.54 cm)

iii. page Numbers shown in Top right side, use Roman figure up to acknowledgment.

iv. Use Arial Unicode MS font, Font size 16 for Sanskrit and font size 14 for English.

v. Foot notes or End notes may be used (Font size 12)

vi. Side heading should be in bold format not underlined and should be numbered.

vii. Appendices (if any)

Viii. Bibliography & References

References should be arranged in alphabetical order and the following details have to be given

1. **Journals- Name of author, Name of Article, Journal, Volume number, Year, Page.**
2. **Books- Name of book, Publisher's name, Publisher's place, Year.**

Complimetary Cources offered to other Departments

Semester	Course code	Title of the Paper	L	C	CE	ESE
I	SY-DE-214	PADAVYAVASTHA AND KRITHYA PRAKARANA Complimentary course for Jyothisha	6	4	25	75
II	SY-DE-224	VYAKARANADARSANAM Complimentary course for Vedanta	6	4	25	75
III	SY-DE-234	APPLICATION OF THE RULES OF PANINI Complimentary course for Sahitya	6	4	25	75
IV	SY-DE-244	VYAKARANAMAHABHASYAM AND VAIYAKARANASIDDHANTHAKAUMUDI Complimentary course for Nyaya	6	4	25	75

Semester	Course Code	Course Title	L	C
I	SY-DE- 214	Complimentary course for Jyothisha	6	4

Title of the Paper : पदव्यवस्था कृत्यप्रकरणं च

(PADAVYAVASTHA AND KRITHYA PRAKARANA)

ERT : वैयाकरणसिद्धान्तकौमुदी

प्रयोजनानि

- आत्मनेपदपरस्मैपदव्यवस्थयोः वैशिष्ट्यं जानाति।
- अनुवृत्तिः कथमिति जानाति।
- वृत्तिविषये, प्रत्ययविषये च सामान्यज्ञानमार्जयति।
- कृत्यप्रकरणे अर्थभेदान् विमृशति।

Module 1. सुप्तिङन्तं पदम् इति पाणिनीयसूत्रस्य परिचायनम् – पदव्यवस्था- आत्मनेपदपरस्मैपदयोः सामान्यव्यवस्था। **(10Marks)**

Module 2. आत्मनेपदपरस्मैपदप्रकरणे । **(30Marks)**

Module 3. पञ्चवृत्तीनां प्रत्ययानां च सामान्यपरिचयः। प्रातिपदिकसंज्ञाविधायकसूत्राणां परिचयः- **(10Marks)**

Module 4. कृदन्ते कृत्यप्रकरणम् । **(25Marks)**

Books for Reference

1. वैयाकरणसिद्धान्तकौमुदी – बालमनोरमाव्याख्यासमेता, भागः 4, पण्डितश्री गोपालसास्त्री नेने,2018.

2. **Paniniyapadavyavastha- Prof. Mahamahopadhyaya R.VasudevanPotti , Sukritindra Oriental Research Institute,2014.(Malayalam)**

E Resources

1. **grops.google.com**
2. **en.m.wikipedia.org.**
3. **learnsanskrit.org**
4. **96droite.com.**

Mobile Applications

1. कृदन्तशिक्षिका।
2. सिद्धान्तकौमुदी।
3. धातुरूपमाला।

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	आत्मवेपदपरस्मैपदव्यवस्थयोः वैशिष्ट्यं जानाति।	2	6	UAN	C
2	अनुवृत्तिः कथमिति जानाति।	2	2	U	C
3	वृत्तिविषये, प्रत्ययविषये च सामान्यज्ञानमार्जयति।	1,2	4	AN	P
4	कृत्यप्रकरणे अर्थभेदान् विमृशति।	2,1	4	U	P

UNIVERSITY OF KERALA

I SEMESTER MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Subject Code: SY- DE-214

Title: पदव्यवस्था कृत्यप्रकरणं च

(PADAVYAVASTHA AND KRITHYAPRAKARANA)

Time: 3Hrs **Total Marks: 75**

सूचना – देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि

Part A

I. सर्वेषां प्रश्नानाम् उत्तराणि लिखत। **(10X1=10)**

1. शप्यम् इत्यत्र यत् प्रत्यय: केन सूत्रेण?

2. यज्ञदत्तम् उपरमति इत्यत्र रम: परस्मैपदं केन सूत्रेण?

3. शत्रुमधिकुरुते इत्यत्र कृञ: आत्मनेपदं केन सूत्रेण?

4. ओरञ् इत्यनेन क: प्रत्यय: विधीयते?

5. चेयम् इत्यत्र यत् प्रत्यय: केन सूत्रेण?

6. संशय्य कर्णादिषु तिष्ठते यः - इत्यत्र कथं तिष्ठते इति प्रयोगः?

7. शकिसहोश्च इति सूत्रेण किं विधीयते?

8. स्नानीयं चूर्णम्- अत्र कथम् अनीयर् प्रत्ययः?

9. अनुकरोति इत्यत्र कृञ: परस्मैपदं केन सूत्रेण?

10. मुक्तावुत्तिष्ठते इत्यत्र स्था धातो: आत्मनेपदं केन सूत्रेण?

Part B

II. पञ्चानां प्रश्नानामुत्तराणि लिखत। (5X2=10)

11. ब्रह्मभूयम् इत्यत्र केन सूत्रेण क्यप् प्रत्ययः इति विशदयत ।

12. अनुदात्तङित आत्मनेपदम् - व्याख्यात।

13.विपराभ्यां जे:- विशदयत।

14. परिमृष्यति- केन सूत्रेण परस्मैपदं,सूत्रार्थ: क:?

15. व्यतिगच्छति- ससूत्रं व्याख्यात।

16. अचो यत् – सोदाहरणं व्याख्यात।

17. तव्यत्तव्यानीयर: इति सूत्रं विशदयत।

Part C

III. पञ्चप्रश्नाः सप्रमाणं व्याख्यात । (5X5=25)

18. आदयते- आदयति- पदव्यवस्थां विशदयत।

19. अर्य: - आर्य: अर्थभेदं सप्रमाणं लिखत।

20. भोज्यं-भोग्यम् – अर्थभेदं सप्रमाणं व्याख्यात।

21. वाच्यम् - वाक्यम् – अर्थभेदं सप्रमाणं साधयत।

22. प्रयाजः – प्रयागः अर्थभेदं सप्रमाणं लिखत।

23. उपरमति – उपरमते पदव्यवस्थां ससूत्रं लिखत।

24. उपलम्भ्यः- उपलभ्यः सप्रमाणं साधयत.

Part D

IV. द्वयोः निबन्धात्मकमुत्तरं लिखत। (2X15=30)

25. कृत्यप्रत्ययान् अधिकृत्य विशदयत।

26. ऋहलोर्ण्यत्, पोरदुपधात्, एतिस्तुशास्वृदृजुष:, ओरावश्यके- सोदाहारणंविशदयत।

27. बुधयुधनशजनेङ्प्रद्रुस्रुभ्योणे:, निरणचतनार्थेभ्यश्च, अभिप्रत्यातिभ्य: क्षिप्र: - व्याख्यात।

28. आङो दोऽनास्यविहरणे, क्रीडोSनुसंपरिभ्यश्च, समवप्रतिभ्य: स्थ:,वेत्तेर्विभाषा- विशदयत।

Semester	Course Code	Course Title	L	C
II	SY-DE- 224	Complimentary course for Vedanta	6	4

Title of the Paper: व्याकरणदर्शनम्

(VYAKARANADARSANAM)

ERT- : वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः

(भूमिकायाः उद्धृताः Module 1 मध्ये दत्ताः विषयाः)

परमलघुमञ्जूषा (For Module 2&3)

वाक्यपदीयम् – ब्रह्मकाण्डम् (For module 4) (Selected portions)

प्रयोजनानि

- व्याकरणस्य दार्शनिकदृष्टिमधिगच्छति।
- व्याकरणस्य मोक्षसाधनत्वं जानाति।
- शब्दब्रह्म जगत्कारणमिति बुद्ध्यते।
- स्फोटस्य तत्त्वं विवेचयति।
- चतुर्णां वाचां बोधः सञ्जायते।

Module 1.दर्शनपदनिरूपणम्- व्याकरणशास्त्रस्य दर्शनशास्त्रत्वम्- शाब्दिकसम्मतानि प्रमाणानि- अन्यशास्त्रसम्बन्धीनि प्रमाणानि- स्फोटविचारः-मीमांसकाः, सांख्याः, नैयायिकाः, वैयाकरणाः। (15 Marks)

Module 2. परमलघुमञ्जू।षायां विद्यमानं शक्तिनिरूपणम्। (20Marks)

Module 3. परमलघुमञ्जू।षायां विद्यमानं स्फोटनिरूपणम् । (20Marks)

Module 4. वाक्यपदीयम् – शब्दब्रह्मस्वरूपम् (कारिकाः १-४) - शब्दब्रह्मणः प्राप्त्युपायः(कारिकाः ५-१०)- सर्वत्र वाग्रूपत्वम् (कारिकाः ११८-१२७) - शब्दतत्त्वप्राप्तिः (कारिका १३२), शब्दतत्त्वम्

कारिका (१४३) (20 Marks)

Books for Reference

1. वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः, डो.कालिकाप्रसादशुक्लः, सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी-1979.
2. परमलघुमञ्जूषा, किरणावली व्याख्या, व्याख्याता आचार्य लोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी,1991.
3. परमलघुमञ्जूषा, भावप्रकाशिका बालबोधिनी व्याख्ये, डो.जयसङ्करलालत्रपाठी, कृष्णदासअकादमी, वाराणसी-1997.
4. वाक्यपदीयम्(ब्रह्मकाण्डम्) व्याख्याद्वयोपेतम्, पद्मश्रीपण्डितरघुनाथशर्मा, सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी,1988.
5. **Vakyapadiyam- Brahmakandam, (Sunilpriya com.)-Dr.Chandrasekharan nair, jai Karthik Books-2000,**

E Resources

1. www.hindupedia.com
2. www.exoyicindiaart.com
3. **archive.org**
4. **epustakalay.com**

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	व्याकरणस्य दार्शनिकदृष्टिमधिगच्छति।	1,3	1,2,3,5	U	C
2	व्याकरणस्य मोक्षसाधनत्वं जानाति।	1,2,3	1,2,3,5	U,AN	M
3	शब्दब्रह्म जगत्कारणमिति बुद्ध्यते।	1,3	1,2,3,5	U	F
4	स्फोटस्य तत्त्वं विवेचयति।	1,2,3	1,2,3,5	AN	C,F
5	चतुर्णां वाचां बोधः सञ्जायते।	1,2,3	1,2,3,5	U	C

UNIVERSITY OF KERALA

III SEMESTER MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Subject Code: SY- DE-224

Title: व्याकरणदर्शनम्

(VYAKARANADARSANAM)

Time: 3Hrs **Total Marks: 75**

सूचना – देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि

Part A

I. सर्वेषां प्रश्नानाम् उत्तराणि लिखत। **(10X1=10)**

1. शाब्दिकसम्मतानि प्रमाणानि कानि?

2. तादात्म्यं नाम किम्?

3. अभ्यासार्थे का वृत्तिः?

4. भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः, कस्य?

5. सङ्केतो नाम कः?

6. वृत्याश्रयः शब्दः कः?

7. योगरूढिः का?

8. न्यायभाष्ये वाक्यसक्षणं किम्?

9. शब्दब्रह्मणः प्राप्त्युपायः कः ?

10. भावविकाराः कति ?

Part B

II. पञ्चानां प्रश्नानामुत्तराणि परमलघुमञ्जूषादिशा लिखत। **(5X2=10)**

11. आप्तलक्षणम्।

12. वृत्तिस्त्रिधा – विशदयत।

13. सम्बन्धः।

14. दर्शनशब्दस्य अर्थं निरूपयत।

15.विकल्पसूत्रम्।

16. जगतः प्रक्रिया कुतः?

17. वन्ध्यासुतः इत्यत्र प्रातिपदिकत्वं कथमिति साधयत।

Part C

III. पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत । (5X5=25)

18. नागेशदिशा लक्षणास्वरूपं विशदयत।

19. नैयायिकाः स्फोटं नाङ्गीकुर्वन्ति, विवेचयत।

20. व्याकरणभेदेन स्थानिभेदेऽपि न क्षतिः, विसदयत.

21. अत एव च न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते- समर्थयत।

22. परमलघुमञ्जूषायां विवेचिताः स्फोटाः के इति निरूपयत.

23. यौगिकरूढशब्दान् मञ्जूषादिशा विश्लेषयत।

24. ध्वनिस्तु द्विविध इति नागेशमतं वाक्यपदीयस्य साह्येन समर्थयत।

Part D

IV. द्वयोः निबन्धात्मकमुत्तरं लिखत। (2X15=30)

25. परमलघुमञ्जूषादिशा वाचः चातुर्थ्यं निरूपयत।

26. व्याकरणस्य दर्शनशास्त्रत्वम् प्रतिपादयत।

27. भर्तृहरिदिशा शब्दब्रह्मस्वरूपं विशदयत।

28. वैयाकरणमते शक्तिस्वरूपं विशदयत.

Paper IV

Semester	Course Code	Course Title	L	C
III	SY-DE- 234	Complimentary course for Sahitya	6	4

Title of the Paper:: पाणिनीयनियमानां प्रयोगाः

APPLICATION OF THE RULES OF PANINI

ERT- कौमुदीकथाकल्लोलिनी । (प्रास्ताविकम्, सन्धिनिर्देशत्मकःप्रथमःकल्लोलः।)

प्रयोजनानि

- सरलानां रोचकानां च कथानकानामवलम्बेन वैय्याकरणसिद्धान्तकौमुद्याः सन्धिभागमवगच्छति।
- भाषायां कथं कौमुदीस्थानाम् उदाहरणानां प्रयोगः इति जानाति ।
- सन्धीनां प्राधान्यावगमःसिद्ध्यति ।
- संस्कृतभाषालेखनप्रसङ्गे सन्धिपदानि उपयोक्तुं समर्थ्यमाप्नोति ।
- साहित्यग्रन्थेषु विद्यमानानि सन्धिपदानि विश्लेषयितुं समर्थ्यं सम्पादयति ।

Module 1. वररुचिवृत्तान्ते 'अस्ति विविधकिन्नरगन्धर्वविद्याधरनिषेवितपादः' इत्यारभ्य 'सविस्तरमभिधातुमेवमुपाक्रमत' इति पर्यन्तम्। (८ खण्डिकाः) **(15 Marks)**

Module 2. 'आसीत् कौशाम्ब्यामग्निशिखापरनामा' इत्यारभ्य 'लक्ष्मीसरस्वत्योः क्षेत्रम्' इति पर्यन्तम्। (९ खण्डिकाः) **(20 marks)**

Module 3. 'एवं वर्षमुखादाकर्ण्य' इत्यारभ्य 'सम्मुखीनो भवितुं नाशकदिति' पर्यन्तम्। (९खण्डिकाः) **(20 Marks)**

Module 4. 'उपकोशा च प्रातश्चेटिकानुगता' इत्यारभ्य प्रथमकल्लोलस्य अवशिष्टभागः। (९ खण्डिकाः) **(20 Marks)**

Books for Reference

1.वैयाकरणसिद्धान्तकौमुदी – बालमनोरमाव्याख्यासमेता, भागः 1, पण्डितश्री गोपालसास्त्री नेने, 2018.

2.कौमुदीकथाकल्लोलिनि – आचार्यरामशरणशास्त्रि (चौखम्बाविद्याभवन्-वारणासि 1989

E RESOURCES

1. **en.m.wikipedia.org**
2. **hi.m.wikipedia.com**
3. **hindigrammer.in**
4. **www.exoticindiaart.com**

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	सरलानां रोचकानां च कथानकानाम् वलम्बेनवैय्याकरणसिद्धान्तकौमुद्यासन्धिभागमवगच्छति।	2	2	U	C
2	भाषायां कथं कौमुदीस्थानाम् उदाहरणानां प्रयोगः इति जानाति।	2	2	U,AN	C
3	सन्धीनां प्राधान्यावगमःसिद्ध्यति।	2,4	2,4,5	U	C
4	संस्कृतभाषालेखनप्रसङ्गे सन्धिपदानि उपयोक्तुं समर्थ्यमाप्नोति।	2,4	2,4,5	AP	M
5	साहित्यग्रन्थेषु विद्यमानानि सन्धिपदानि विश्लेषयितुं समर्थ्यं सम्पादयति।	2	2,6	AN,AP	M

UNIVERSITY OF KERALA

III SEMESTER MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Subject Code: SY- DE-234

Title: पाणिनीयनियमानां प्रयोगाः

(APPLICATION OF THE RULES OF PANINI)

Time: 3Hrs **Total Marks: 75**

सूचना – देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि

Part A

I. सर्वेषां प्रश्नानाम् उत्तराणि लिखत। **(10X1=10)**

1. वररुचेः गुरुः कः?

2. हिमवतः उत्तरसानोः नाम किम्?

3. शर्वाणीशप्तः पुष्पदन्तः अनन्तरजन्मनि केन नाम्ना प्रथितः?

4.सुतौ + आवाम्- सुतावावाम्, अत्र केन सूत्रेण सन्धिः?

5. तिष्ठन् इत्यत्र कः प्रत्ययः?

6. ब्रह्मा द्वित्वाभावः कुतः?

7. नगेन्द्रजाजानिः इत्यत्र कः प्रत्ययः?

8. शुष्कः कथं कप्रत्ययः?

9. निजजायायायुद्घाटितम् - अत्र सन्धिच्छेदः कः?

10. कौमुदीकथाकल्लोलिन्याः कर्ता कः?

Part B

II. पञ्चानां प्रश्नानामुत्तराणि लिखत। **(5X2=10)**

11. शैशवे + एव-शैशव एव प्रक्रियां लिखत।

12. यत् + लिख्यते, प्रक्रियां निरूपयत।

13. नगरस्येति – पदच्छेदः कः।

14. श्रव्यं –प्रत्ययः कः.।

15. चैवम् – सन्धिकार्यं लिखत।

16.अधिवसति तम्- विशदयत।

17. भवान्यापि – सन्धिच्छेदं विलिख्य प्रक्रियां कुरुत।

Part C

III. पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत । (5X5=25)

18. स्व + औन्नत्यम्, सन्धत्त।

19. धात्रंशः – सन्धिच्छेद कृत्वा विशदयत।

20. किञ्चित् + मात्रम् –विशदयत।

21. इति+ एनम् – ससूत्रं सन्धत्त।

22. तदा + एव ससूत्रं विशदयत।

23. यदैव + अहं, विषदयत.

24. शापवशात् + च, ससूत्रं विसदयत।

Part D

IV. द्वयोः निबन्धात्मकमुत्तरं लिखत। (2X15=30)

25. एकदा ब्रह्मा मधरिश्च मामीक्षतुं महीमटन्तौ हिमवत्पादमूलं आगतवन्तौ, दृष्टवन्तौ च तत्रैकं महाज्वालालिङ्गम्। तस्यान्तम् अवालुलोकयिषुः एकोऽधस्तात् अपरश्च उपरिष्टाद् अगमत्। (अधोरोखाङ्गितानां प्रक्रियां कुरुत)।

26,. सुध्युपास्य, अथैकदा, शिवायाक्रुध्यत्, विप्रावस्मद्गृहमाश्रयताम्, उपैष्यामि – सन्धिं निरूपयत ।

27. हेरम्बस्यावदत्, हसतीव, जयया सह, क्षय्यम्, भ्रातरावभूताम् – व्याकरणकार्यं विवेचयत।

28. भाषायां कथं कौमुदीस्थानां उदाहराणानां प्रयोगः भवति इति कौमुदीकथाकल्लोलिनीसाह्येन निरूपयत।

Semester	Course Code	Course Title	L	C
IV	SY-DE - 244	Complimentary course for Nyaya	6	4

Title of the paper: व्याकरणमहाभाष्यं सिद्धान्तकौमुदी च

VYAKARANAMAHABHASYAM AND VAIYAKARANASIDDHANTHAKAUMUDI

ERT- व्याकरणमहाभाष्यम् – पस्पशाह्निकम् (**For Module I & II)**

वैयाकरणसिद्धान्तकौमुदी – भट्टोजिदीक्षितः। **(For Module III & IV)**

प्रयोजनानि

1. शब्दानुशासनाध्ययनस्य प्रयोजनम् अवगच्छति।

2. शब्दार्थयो: तातात्म्यसम्बद्धं जानाति।

3. अष्टाध्याय्या: रचनाविषये ज्ञानं सम्पादयितुम्।

4. उच्चारणदोषा: के इति बुद्ध्यते।

5. स्त्रीप्रत्ययानां प्रयोगे सामर्थ्यं सम्पादयते।

Module 1. महाभाष्यम् – पस्पशाह्निकं व्याकरणाध्ययनस्य आनुषङ्गिकप्रयोजनपर्यन्तम्।

(15 Marks)

Module 2. महाभाष्यम्– पस्पशाह्निकंवर्णोपदेशप्रयोजनपर्यन्तम् **(20Marks)**

Module III .

Selected Sutras from sthripratyayaprakarana (Vaiyakaranasiddhanthakoumudi)

1. सुप्तिङन्तं पदम् । 2. अजाद्यतष्टाप्। 3. ऋन्नेभ्यो ङीप्।4. उगितश्च।5. वनो र च। 6. पादोऽन्यतरस्याम्। 7. टाबृचि। 8. मन:। 9. अनो बहुव्रीहे:।10. प्रत्यस्थात् कात् पूर्वस्यात इदाप्यसुप:। 11. भाषितपुंस्काच्च।12.अनुपसर्जनात्। 13. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप:।14.

नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्। (वा)।15. यञश्च।16. हलस्तद्धितस्य।17. प्राचां ष्फ तद्धित:। 18. ष: प्रत्ययस्य। 19. आयनेयीनीयिय: फढखछघां प्रत्यायादीनाम्। 20. वयसि प्रथमे। **(20 marks)**

Module IV.

Selected Sutras from sthripratyayaprakarana (Vaiyakaranasiddhanthakoumudi)

21. द्विगो:।22. प्रत्युर्नो यज्ञसंयोगो ।23.विभाषा स पूर्वस्य ।24. नित्यं स पत्न्यादिषु । 25. अन्यतो ङीष् ।26. षिद्गौरादिभ्यस्श्च । 27.वोतो गुणवचनात ।28. बह्वादिभ्यस्श्च ।29. पुंयोगादाख्यायाम् ।30. इन्द्रवरुणभवशर्वरुद्रमड्हिमारण्ययवमातुलाचार्याणामानुक् ।31. नखमुखात् संज्ञायाम् । 32. दिक्पूर्वपदान्ङीप् । 33. इतो मनुष्यजातेः ।34. ऊडुतः । 35. पड्गोश्च । 36. शाड्र्गरवाघञो ङीन् । 37. यङश्चाप् । 38. यूनस्तिः । **(20 Marks)**

Reference

1.श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम् (प्रदीपोद्योतसहितम्), प्रथमखण्डः, चौखम्बा संस्कृतप्रतिष्ठान्, दिल्ली-1992.

2. महाभाष्यार्थदीपिका (नवाह्निकान्तः), प्रथमो भागः, प्रो. कृष्णकुमारः, चिन्मय इन्टर्नेशनल् फाउण्डेषन् शोधसंस्थान्, केरलम्, 2015.

3.**Vyakaranamahabhasya with Malayalam commentary Punarnava, Translation and Commentary Prof. O .Vatsala, Published by Chinmaya International Foundation shodha Sansthan.**

4. व्याकरणमहाभाष्य (प्रथमनवाह्निक), हिन्दीअनुवाद तथा विवरम, मोत्तिलाल् बनार्सीदास, 1984.

5. वैयाकरणसिद्धान्तकौमुदी – बालमनोरमाव्याख्यासमेता, भागः 4, पण्डितश्री गोपालसास्त्री नेने,2018.

E Resources

1. www.indianculture.gov.in
2. www.examveda.com
3. **en.m.wikipedia.org**
4. www.britannica.com
5. www.cambridge.org

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1.	शब्दानुशासनाध्ययनस्य प्रयोजनम् अवगच्छति।	1	1,2,5	U	C
2.	शब्दार्थयो: तातात्म्यसम्बद्धं जानाति।	1,2	1,2	U	C
3	अष्टाध्याय्या: रचनाविषये ज्ञानं सम्पादयितुम्।	1,2	2,5	U,AN	F
4	उच्चारणदोषा: के इति बुद्ध्यते।	2	2,5	U,AN	F
5	स्त्रीप्रत्ययानां प्रयोगे सामर्थ्यं सम्पादयते।	2,4	4,2	U,AN,AP	M

UNIVERSITY OF KERALA

IV SEMESTER MA SANSKRIT SPECIAL EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Subject Code: SY- DE-244

Title: व्याकरणमहाभाष्यं सिद्धान्तकौमुदी च

(VYAKARANAMAHABHASYAM AND VAIKARANASIDDHANTHAKAUMUDI)

Time: 3Hrs **Total Marks: 75**

सूचना – देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि

Part A

I.सर्वेषां प्रश्नानाम् उत्तराणि लिखत। **(10x1=10)**

1. महाभाष्यकारः कः?

2. अथ शब्दानुशासनम्- केषां शब्दानाम्?

3.षट्सु अङ्गेषु किं प्रधानम्?

4.प्रयोजनः इत्यस्य अर्थः कः?

5.किं नाम काकुदम्?

6. उगितश्च इति सूत्रस्य अर्थं विलिख्य उदाहरणं लिखत?

7. अनो बहुव्रीहेः इति सूत्रेण किं विधीयते?

8.कुमारी इत्यत्र केन सूत्रेण ङीप्?

9.पत्युर्नो यज्ञसंयोगे इत्यस्य उदाहरणं किम्?

10. कुरूः इत्यत्र कः प्रत्ययः?

Part B

II. पञ्चानां प्रश्नानामुत्तराणि लिखत। **(5x2=10)**

11. भाष्यदिशा ध्वनेः शब्दत्वमुपपादयत?

12.धर्मनियमः इति दलस्य अर्थं लिखत?

13.भद्रैषां लक्ष्मीर्निहिताधिवाचि इत्यस्य अर्थं लिखत?

14.व्याकरणम् इति शब्दस्य कः पदार्थः ?

15. अजा रूपं ससूत्रं व्याख्यात ?

16. पादोऽन्यतरस्यम् इति सूत्रार्थं लिखित्वा उदाहरणं प्रदर्शयत ?

17. द्विगोः इति सूत्रं विशदयत ?

Part C

III.पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत। **(5x5=25)**

18.चत्वारि – विशदयत।

19.किमर्थो वर्णानामुपदेशः।

20.किं पुनः आकृतिः पदार्थः आहोस्वित् द्रव्यम् इति निरूपयत।

21.आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः- विशदयत।

22.ज्ञाने धर्म इति चेत्तथा अधर्मः, इति वार्तिकस्य अर्थः कः।

23.नखमुखात्संज्ञायाम् इति सूत्रं विशदयत।

24. युवतिः इति रूपं ससूत्रं साधयत।

Part D

IV.द्वयोः निबन्धात्मकमुत्तरं लिखत। **(2x15=30)**

25.व्याकरणाध्ययनस्य प्रयोजनप्रयोजनानि कानि इति महाभाष्यानुसारं निरूपयत।

26.शब्दानुशासनं कथं कर्तव्यम् इत्यत्र महाभाष्यकाराशयः कः।

27.वैयाकरणसिद्धान्तकौमुद्यनुसारं ङीप् विधायकसूत्राणि लिखत।

28. अथ प्रदत्तानि सूत्राणि सोदाहरणं वैयाकरणसिद्धान्तकौमुदीदिशा विशदयत।

क) अजाद्यतष्टाप्।

ख) प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः।

ग) वोतो गुणवचनात्।

घ) षिद्गौरादिभ्यश्च।

UNIVERSITY OF KERALA

THIRUVANANTHAPURAM

DEPARTMENT OF SANSKRIT JYOTHISHA

OUTCOME BASED TEACHING LEARNING AND EVALUATION

2021

केरलविश्वविद्यालयः

संस्कृतज्योतिषविभागः

ज्योतिषम् एम्.ए. प्रक्रमः 2021 तमे वर्षे परिष्कृतः अध्यापनाध्ययनपरीक्षाणां प्रयोजननिष्ठः सम्प्रदायः ।

पाठ्यविषयपुस्तिका

Outcome Based Teaching Learning and Evaluation -2021

Department of Sanskrit Jyothisha

University Kerala

ज्योतिश्शास्त्रम्

आमुखम्

सर्वप्रचारप्रमाणभूतस्य वेदस्य सम्यगवगमनाय शिक्षाकल्पादिषड्वेदाङ्गानि समुत्पन्नानि। तेषु कालनिर्धारकं शास्त्रमिदं ज्योतिश्शास्त्रं कालस्य प्राधान्यत्वादद्वितीयं स्थानमावहति। वेदपुरुषस्य चक्षुरूपमिदं शास्त्रं षडङ्गभूतं त्रिस्कन्धात्मकं च भवति। तेषु गणितं संहिता होरा चेति त्रिषु स्कन्धेषु अन्तर्भवन्ति जातकगोलनिमित्तप्रश्नमुहूर्तगणिताख्यानि षडङ्गानि। एषां ज्योतिश्शास्त्रान्तर्गतानां विषयाणां सामान्यपरिचयाय विशेषविषयावगमनाय तथा प्रौढविचिन्तनामवसरप्रदानाय च पाठ्यपद्धतिरियं विद्वद्भिः साकं समालोच्य सुसाधितम्।

Program Outcomes (POs) of University of Kerala

PO1: critical Thinking : Take informed actions after identifying the assumptions that frame our thinking and actions, checking out the degree to which these assumptions are accurate and valid, and looking at our ideas and desions (intellectual, organizational, and personal) from different perspectives.

PO2: Communication: Speak, read, write and listen clearly a person and through electronic media in English/language of the displine, and make meaning of the world by connecting people, ideas, books, media, and technology.

PO3: Problem Solving: Identify, formulate, conduct investigations, and find solutions to problem based on in-depth knowledge of relevant domains.

PO4: Ethics: Recognize different value systems including your own, understand the moral dimensions of your decisions, and accept responsibility for them.

PO5: Self- directed and Life- long Learning: Acquire the ability to engage in Independent and life-long learning in the broadcast context socio technological changes.

Out Comes of Sanskrit Jyothisha Program

PO1: Understand the higher texts of Sanskrit Jyothisha.

PO2: Analyze the Astrological and Astronomical Theories.

PO3: Efficiently converse with other related disciplines.

PO4: Generate the Panchanga and Jathaka easily.

PO5: know the contribution of Kerala to Astrology and Astronomy.

PO6: Acquire practical knowledge of Astrology and Astronomy.

एम्.ए.संस्कृतज्योतिषप्रक्रमः

चत्वारि षाण्मास्यानि एम्.ए. संस्कृतज्योतिषप्रक्रमे वर्तन्ते। प्रतिषाण्मास्यं चत्वारो विषयाः। तत्र Core Course (CC) रूपेण त्रयः विषयाः complimentary Course(DE) रूपेण एकश्च।

एम्.ए.संस्कृतज्योतिषप्रक्रमस्य मुख्यप्रयोजनानि।

1. प्रौढान् ज्योतिषग्रन्थान् अधिगच्छति।
2. ज्योतिषसिद्धान्तान् समीक्षते।
3. निपुणतया शास्त्रान्तरैः संवदते।
4. यथायथं कालनिर्धारणे सामर्थ्यमाप्नोति।
5. लोके ज्योतिषस्य शास्त्रतत्वं प्रकाशते।
6. पञ्चाङ्गादिनिर्माणनैपुण्यम् आदत्ते।
7. ज्योतिश्शास्त्रविषये केरलीयानां योगदानमवगच्छति।
8. कालस्य विभिन्नावस्थाः परिवर्तनानि च सम्यक् अवगच्छति।
9. संस्कृतस्य ज्योतिषस्य च पठन-पाठन-प्रचारण-अनुसन्धानक्षेत्रेषु सामर्थ्यप्राप्नोति।
10. शास्त्राणां प्राचीनार्वाचीनसिद्धान्तानां च विषये तातात्म्यतारतम्यात्मकरूपेण अवगाहं प्राप्नोति।

11. परिभाषिकशब्दाः

OBTLE- Out come Based Teaching Learning and Evaluation

अध्यापनाध्ययनपीक्षाणां प्रयोजननिष्ठः सम्प्रदायः

CL- Cognitive (धारणाशक्तिस्तरः)

R- Remember (स्मरति)

U- Understanding (जानाति)

AP-Apply (प्रयोजयति)

AN- Analyze (अपग्रथ्नाति)

EV- Evaluation(परीक्षते)

C- Create (सृजति)

KC- Knowledge category (ज्ञानस्य गणविशेषः)

F- Factual (वास्तविकम्)

C- Conceptual (परिकल्पितम्)

P- Procedural (आनुक्रमिकम्)

M- Metacognitive (अधिधारणम्)

Po- Program Outcome (प्रक्रमप्रयोजनम्)

PSO- Program Specific out come (प्रक्रमविशेषप्रयोजनम्)

CO- Course Out come (विषयप्रयोजनम्)

Program- प्रक्रमः

Semester- षाण्मास्यम्

Internal- आभ्यन्तरम्

External- बाह्यम्

Assignment- निर्दिष्टकार्यम्

Seminar Presentation- प्रबन्धप्रस्तुतिः

Internal Examination- आभ्यन्तरपरीक्षा

Attendance - उपस्थितिः

परीक्षाप्रणाली

क) आभ्यन्तरपरीक्षा

1.वाक्यार्थसभा, श्लोकादीनां कण्ठस्थीकरणम्, निर्दिष्टाभ्यास इत्यादयः। (5 Marks)

2.शोधप्रबन्धप्रस्तुतिः। (5 Marks)

3.उपस्थितिः (5 Marks)

4.अवान्तरपरीक्षा। (10 Marks)

ख) बाह्यपरीक्षा – षाण्मास्यान्ते लेखनपरीक्षा।

ग) प्रश्नस्वरूपम्

1.पाठ्यविषयाधिष्ठिताः प्रश्नाः संस्कृतमाध्यमेन ।

2.विषयेषु छात्राणां ज्ञानं प्रश्नैः परीक्ष्यते।

3.ज्ञातस्य विषयस्य प्रयोगः परीक्ष्यते।

4.चतुर्धा विभक्तस्य पाठ्यविषयस्य चतुर्ष्वपि अंशेषु परीक्षा भवति।

SYLLABUS FOR M.A. SANSKRIT JYOTHISHA IN AFFILIATED COLLEGES

2021 ADMISSION ONWARDS

M.A. SANSKRIT JYOTHISHA COURSE STRUCTURE AND MARK DISTRIBUTION

Semester	Paper Code	Title of the Paper	Distribution Hrs. per Semester	Instructional Hrs. per week		ESA Hrs.	Maximum Marks		
				L	P		CA	ESA	Total
I	SJCC 211	**Jātakaphalādeśah (जातकफलादेशः)**	126	7	-	3	25	75	100
	SJCC 212	**Jyotiśśāstrasya Itihāsah (ज्योतिश्शास्त्रस्येतिहासः)**	108	6	-	3	25	75	100
	SJCC 213	**Gaṇitajyotiṣam (गणितज्योतिषम्)**	108	6	-	3	25	75	100

	SYDE 214	**PADAVYAVASTHA AND KRITHYA PRAKARANA**	108	6	-	3	25	75	100
	Total		450	25	-				

Semester	Paper Code	Title of the Paper	Distribution Hrs. per Semester	Instructional Hrs. per week		ESA Hrs.	Maximum Marks		
				L	P		CA	ESA	Total
II	SJCC 221	**Muhūṛtaphalaniṛdeśah (मुहूर्तफलनिर्देशः)**	126	7	-	3	25	75	100
	SJCC 222	**Praśnānuṣṭhānam(प्रश्नानुष्ठानम्)**	108	6	-	3	25	75	100
	SJCC	**Grahabalagaṇitam**	108	6	-	3	25	75	100

	223	(ग्रहबलगणितम्)							
	SNDE 224	**Fundamentals Of Nyayavaiseshika**	108	6	-	3	25	75	100
	Total		450	25				-	

Semester	Paper Code	Title of the Paper	Distribution Hrs. per Semester	Instructional Hrs. per week		ESA Hrs.	Maximum Marks		
				L	P		CA	ESA	Total
III	SJCC 231	**Praśnaphalādeśah** (प्रश्नफलादेशः)	126	7	-	3	25	75	100
	SJCC 232	**Samhitājyotiṣam** (संहिताज्योतिषम्)	108	6	-	3	25	75	100
	SJCC	**Gōlagaṇitam** (गोलगणितम्)	108	6	-	3	25	75	100

	233								
	SV DE 234	**Rgveda And Kathopanishad**	108	6	-	3	25	75	100
	Total		450	25				-	

Semester	Paper Code	Title of the Paper	Distribution Hrs. per Semester	Instructional Hrs. per week		ESA Hrs.	Maximum Marks		
				L	P		CA	ESA	Total
IV	SJ CC 241	**Navīnajyotiṛvijñānam (नवीनज्योतिर्विज्ञानम्)**	126	7	-	3	25	75	100
	SJ CC 242	**Navīnagrahagaṇitam (नवीनग्रहगणितम्)**	108	6	-	3	25	75	100
	SJ CC 243	**Daśāvicārah (दशाविचारः)**	108	6	-	3	25	75	100

	SS-DE-244	**POETICS & POETRY**	108	6	-	3	25	75	100
	SJ CC 245	**Dissertation**	-	-	-	-	20 (Viva)	80	100
	SJ CC 246	**Viva-voce**	-	-	-	-	-	-	100
	Total		450	25		-	Grand Total		1800

प्रश्नपत्रस्वरूपम्

Time- 3hrs Marks- 75

सूचना- देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि।

		No.of questions	Marks
I	Part A (Answer all questions.Each question carries 1 mark). सर्वेषां प्रश्नानाम् उत्तराणि लिखत।	1-10	10X1=10
II	Part B (Answer any 5 questions .Each question carries 2 marks) पञ्चानां प्रश्नानाम् उत्तराणि लिखत।	11-17	5X2=10
III	Part C (Answer any 5 questions. Each question carries 5 marks) पञ्चानां प्रश्नानां पुटात्मकमुत्तराणि लिखत।	18-24	5X5=25

IV	Part D (Answer any 2 questions. Each question carries 15 Marks) द्वयोः निबन्धात्मकमुत्तरं लिखत।	25-28	2X15=30
	Total	28 Questions	75

UNIVERSITY OF KERALA

MA SANSKRIT JYOTHISHA EXAMINATION

2021 ADMISSION ONWARDS

PATTERN OF QUESTION PAPER

Title: Subject Code :

TIME 3 Hrs. Total Marks : 75

देवनागरीलिपिमुपयुज्य संस्कृतभाषया उत्तराणि लेखनीयानि।

PART-A

(Answer all Questions. Each Question carries 1 Mark)

I. सर्वषां प्रश्नानाम् उत्तराणि लिखत। 10X1 = 10

1.

2.

3.

4.

5.

6.

7.

8.

9.

10.

PART-B

(Answer any 5 questions. Each question Carries 2 Marks)

II. पञ्चानां प्रश्नानाम् उत्तराणि लिखत। 5x2=10

11.

12.

13.

14.

15.

16.

17.

PART-C

(Answer any 5 questions. Each question carries 5 Marks)

III. पञ्चानां प्रश्नानांपुटात्मकमुत्तराणि लिखत। 5x5 =25

18.

19.

20.

21.

22.

23.

24.

PART-D

(Answer any 2 questions. Each question carries 15 Marks)

III. द्वयोः निबन्धात्कममुत्तरं लिखत। 2x15 = 30

25.

26.

27.

28.

Distribution of Marks

Total no. of Question	Questions to be answered	Marks	Total
10	10	10	10 x 1 = 10
7	5	2	5 x 2 = 10
7	5	5	5 x 5 = 25
4	2	15	15 x 2 = 30

M.A. Degree Examination in Sanskrit Jyothisha

Syllabus 2021 Admission onwards

Semester	Course Code	Course Title	L	C
I	SJ-CC - 211	Core Course – Jyothisha I	7	4

Title of the Paper : **Jātakaphalādeśah (जातकफलादेशः)**

प्रयोजनानि

1.ज्योतिश्शास्त्रप्राधान्यं स्वरूपं स्वरूपविशेषं च अवगच्छति।

2.राशिग्रहनक्षत्रसम्बन्धं षड्वर्गान् च विवेचयति।

3.भावानां परिचयः – भावेषु सूर्यादिग्रहाणां स्थितिवशात् फलप्रवचनसामर्थ्यं सम्पादयति।

4.ग्रहाणां लग्न-चन्द्रलग्नवशात् भावस्थितिं महायोगफलानि अपि जानाति।

5.बालारिष्टयोगान् योगानुभवकालम् अरिष्टभङ्गयोगांश्च उदाहरणेन विजानाति।

6.योगानां निरीक्षणपटुत्वं प्राप्नोति।

विषयविभागः

प्रथमांशः – ज्योतिश्शास्त्रस्वरूपं प्राधान्यं राशीनां ग्रहाणां राश्यधिपानां षड्वर्गाणां च परिचयः, भावानां कारकत्वञ्च। ERT – फलदीपिका(मन्त्रेश्वरः, चौखम्बा विद्याभवन् वाराणसी - 2012) 1,2 अध्यायौ।

द्वितीयांशः - शुभाशुभभावानां विचिन्तनं, भावपुष्टिः, भावविनाशः, भावफलेन लग्नादिभावचिन्ता च। ERT – फलदीपिका(मन्त्रेश्वरः, चौखम्बा विद्याभवन् वाराणसी - 2012) Chapter 15

तृतीयांशः - दशवर्ग-वर्गादिविचिन्तनं, पञ्चमहायोगाः फलानि च। ERT – फलदीपिका(मन्त्रेश्वरः, चौखम्बा विद्याभवन् वाराणसी - 2012) अध्यायः- 3 श्लोकाः 1-12, अध्यायः 6श्लोकाः 1-4.

चतुर्थांशः - बालानां जन्मकालग्रहस्थितिवशात् सूचितारिष्टयोगानाम् अरिष्टभङ्गयोगानाञ्च सोदाहरण-चिन्तनम्। ERT- सारावली (कल्याणवर्मा, मोत्तिलाल बनारसीदास दिल्ली) अध्यायः 10(1-50 श्लोकाः), अध्यायः 11 (पूर्णम्)।

Books for Additional Reference

1. Brihajjataka – Varahamihira.
2. Brihatsamhita – Varahamihira.
3. Prasnamargah – Edakkad Namputhiri.
4. Jatakadesha

Distribution of Marks

Ist Semester Subject Code – SJ 211

Module	1	2	5	15
I	3	2	2	1
II	3	2	1	1

III	2	2	2	1
IV	2	1	2	1

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	ज्योतिश्शास्त्रप्राधान्यं स्वरूपं स्वरूपविशेषं च अवगच्छति।	1	2	U	F
2	राशिग्रहनक्षत्रसम्बन्धं षड्वर्गान् च विवेचयति।	2	2	AN	F
3	भावानां परिचयः – भावेषु सूर्यादिग्रहाणां स्थितिवशात् फलप्रवचनसामर्थ्यं सम्पादयति।	3	3	AN	C
4	ग्रहाणां लग्न-चन्द्रलग्नवशात् भावस्थितिं महायोगफलानि अपि जानाति।	2	3	U	C
5	बालारिष्टयोगान् योगानुभवकालं अरिष्टभङ्गयोगांश्च उदाहरणेन विजानाति।	6	2	U	M
6	योगानां निरीक्षणपटुत्वं प्राप्नोति।	6	3	AN	F

Semester	Course Code	Course Title	L	C
I	SJ-CC -212	Core Course – Jyothisha II	6	4

Title of the Paper : **Jyotiśśāstrasya Itihāsah ज्योतिश्शास्त्रस्येतिहासः)**

प्रयोजनानि

1.ज्योतिश्शास्त्रस्य इतिहासम् अवगच्छति।

2. ज्योतिश्शास्त्रस्य उद्भवस्य विकासस्य च अवबोधं जनयति।

3.ज्योतिश्शास्त्रीयपठनांशानां परिचयं जनयति।

4.वैदिक-प्राग्वैदिकज्योतिश्शास्त्राणां विविच्यावगमनम्।

5. संस्कृतपदानि प्रयोगान् च अवजानन्ति।

6.संस्कृतभाषया व्यवहारं कर्तुं सामर्थ्यं प्राप्नोति।

विषयविभागः

प्रथमांशः - ज्योतिश्शास्त्रस्वरूपं ज्योतिश्शास्त्रविकासः च।

ERT-ज्योतिश्शास्त्रस्येतिहासः (आचार्य लोकमणिदाहाल, चौखम्बा, वाराणसी)

(ज्योतिश्शास्त्रविकासपर्यन्तम्)

द्वितीयांशः - ज्योतिश्शास्त्रविषयाः तत्र सिद्धान्त-संहिता-होरास्कन्धानां विविच्य परिचयः तथा ग्रन्थानां शास्त्रस्य उत्पत्तेः च विवरणम्। ERT-ज्योतिश्शास्त्रस्येतिहासः (आचार्य लोकमणिदाहाल, चौखम्बा, वाराणसी) (ज्योतिश्शास्त्रविकासात् ज्योतिश्शास्त्रोत्पत्तिपर्यन्तम्)

तृतीयांशः- प्राग्वैदिक-वैदिककाले ज्योतिषस्य स्वरूपं विकासश्च।
ERT- ज्योतिश्शास्त्रस्येतिहासः (आचार्य लोकमणिदाहाल, चौखम्बा,वाराणसी) (प्राग्वैदिककाले ज्योतिश्शास्त्रस्यस्वरूपम् आरभ्य वेदाङ्गज्योतिषं यावत्।)

चतुर्थांशः - संस्कृतपदानां वाक्यानां वाक्यप्रयोगाणां व्याकरणविशेषाणां च परिचयः उदाहरणेन। ERT-प्रथमदीक्षा – पूर्णम् (राष्ट्रियसंस्कृतसंस्थान्, नवदिल्ली)

Books for Additional Reference

1. Jyotirnibandhadarsha – Dr.Sathrughnathripadhi
2. Ganakatharanginee – Sudhakaradwivedi.
3. Kerala Sanskrit Literature – Kunjunniraja.
4. Roopachandrika – Choukhamba Publisher.

Distribution of Marks

Ist Semester Subject Code – SJ 212

Module	1	2	5	15
I	2	1	2	1
II	3	1	2	2
III	2	1	1	0
IV	3	4	2	1

	प्रयोजनानि	प्र.प्रयो.	प्र.वि.प्रयो	धार.	ज्ञा.ग
1	ज्योतिश्शास्त्रस्य इतिहासम् अवगच्छति।	1	1	U	F
2	ज्योतिश्शास्त्रस्य उद्भवस्य विकासस्य च अवबोधं जनयति।	2	5	U	F
3	ज्योतिश्शास्त्रीयपठनांशानां परिचयं जनयति।	1	2	CL	F
4	वैदिक-प्राग्वैदिकज्योतिश्शास्त्राणां विविच्यावगमनम्।	3	2	AN	C
5	संस्कृतपदानि प्रयोगान् च अवजानन्ति।	5	9	AP	P
6	संस्कृतभाषया व्यवहारं कर्तुं सामर्थ्यं प्राप्नोति।	5	9	AP	P

Semester	Course Code	Course Title	L	C
I	SJ-CC-213	Core Course – Jyothisha III	6	4

Title of the Paper : **Gaṇitajyotiṣam (गणितज्योतिषम्)**

प्रयोजनानि

1.ज्योतिश्शास्त्रसिद्धान्तानाम् अवगतिः।

2.कालस्य प्राधान्यं विविधकालमानानां परिचयञ्च अवगच्छति।

3.वेधेन मध्यमग्रहानयनं जानाति।

4.ज्यासाधनं ग्रहस्पष्टीकरणं च अवगच्छति।

5.पञ्चाङ्गसाधनपद्धतिं विजानाति।

6.क्षेत्रव्यवहारेषु त्रिकोणक्षेत्रादीनां परिचयो जायते।

विषयविभागः

प्रथमांशः - भारतीयज्योतिषपद्धतिः विविधकालमानानि च।
